# 46 - षड्चत्वारिंश दशकम्
# विश्वरूप दर्शनम्

अयि देव पुरा किल त्वयि स्वय मुत्तान शये स्तनन्धये ।
परिजृम्भणतो व्यपावृते वदने विश्व मचष्ट वल्लवी ॥ ॥46-1॥

पुन रप्यथ बालकैस् समं त्वयि लीला निरते जगत्पते ।
फल सञ्चय वञ्चन क्रुधा तव मृद्भोजन मूचु रर्भकाः ॥ ॥46-2॥

अयि ते प्रल यावधौ विभो क्षिति तोयादि समस्त भक्षिणः ।
मृदु पाशनतो रुजा भवेत् इति भीता जननी चुकोप सा ॥ ॥46-3॥

अयि दुर्विन यात्मक त्वया किमु मृत्सा बत वत्स भक्षिता ।
इति मातृ गिरं चिरं विभो वितथां त्वं प्रतिजज्ञिषे हसन् ॥ ॥46-4॥

अयि ते सकलैर् विनिश्चिते विमतिश् चेद् वदनं विदार्यताम् ।
इति मातृ विभर्त्सितो मुखं विकसत् पद्म निभं व्यदारयः ॥ ॥46-5॥

अपि मृल्लव दर्श नोत्सुकां जननीं तां बहु तर्पयन् निव ।
पृथिवीं निखिलां न केवलं भुवना न्यप्यखिला न्यदी दृशः ॥ ॥46-6॥

कुहचिद् वन मम्बुधिः क्वचित् क्वचि दभ्रं कुहचित् रसा तलम् ।
मनुजा दनुजाः क्वचित् सुराः ददृशे किं न तदा त्व दानने ॥ ॥46-7॥

कलशाम्बुधि शायिनं पुनः पर वैकुण्ठ पदाधि-वासिनम् ।
स्वपुरश्च निजार्भ कात्मकं कतिधा त्वां न ददर्श सा मुखे ॥ ॥46-8॥

विकसद् भुवने मुखोदरे ननु भूयोऽपि तथा विधाननः ।
अनया स्फुट मीक्षितो भवान् अनवस्थां जगतां बतातनोत् ॥ ॥46-9॥

धृत तत्त्व धियं तदा क्षणं जननीं तां प्रणयेन मोहयन् ।
स्तन मम्ब दिशेत्युपासजन् भगवन् नद्भुत बाल पाहिमाम् ॥ ॥46-10॥

॥ सदा सर्वत्र गोविन्द नाम संकीर्तनम् गोविन्दा....गोविन्दा ॥
॥ श्री गुरुवायूरप्पा शरणम् श्री हरये नमः॥